# केन्द्रीयसंस्कृतविश्वविद्यालयः

## कुलगीतम्

ज्ञानप्रभां विकिरन् सदा भुवि राजते नवभास्करः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥

विश्वाद्यसंस्कृतिसेवको निजराष्ट्रगौरवभासकः ।
सभ्याभिवन्दित-सत्यविद्यासत्कलासमुपासकः ॥
वेदांग-वेद-पुराण-दर्शन-काव्य-शास्त्रसुधाधरः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥
॥ज्ञानप्रभां॥

प्राचीन-बोध-परम्परा-संवाहको बुधमण्डितो ।
नवबोधशोधपरम्परापरिपालनेऽपि च पण्डितः ॥
विविधाधुनिकसंसाधनैः सज्जः सुरम्यकलेवरः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥
॥ज्ञानप्रभां॥

अज्ञानगाढतमी हरन् समदुर्गुणादि-निरोधकः ।
प्राचीननव्यविचारसंगम-मानवत्वविबोधकः ॥
योऽनूचानः स नो महानिति घोषणपोषणतत्परः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥
॥ज्ञानप्रभां॥

कार्यक्रमैर्विविधैः सदा निजसंस्कृताय समर्पितः ।
कूपारपादहिमालयास्यः सर्वदिक्षु च चर्चितः ॥
नानापरिसरो भारते भरते प्रशस्त-यशः सरः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥
॥ज्ञानप्रभां॥

नवदृष्टिशक्तिसमूर्जितो नवयोजनापरियोजनो ।
नवनीतिरीतिसमुन्नतो नवकल्पनारचनाचणः ॥
नवलोपलब्धिबिभासितो गुरुवाग्विलासमनोहरः ।
केन्द्रीय-संस्कृत-विश्वविद्यालय उदात्तगुणाकरः ॥
॥ज्ञानप्रभां॥

(इदं कुलगीतं दरबारी-भैरवी-मालकोंस-मियामल्हार-हिण्डोल-झिंझोटी-प्रभृतिविविधरागेषु रूपकताले अन्यतालेष्वपि वा गातुं शक्यते । श्रीरामचन्द्रकृपालु भज मन .... इतिवत् ।)

-डा. शैलेशकुमारतिवारी
व्याकरणविभागाध्यक्षः, उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम्